



६

# समर्थेन कृषिः कार्या लोकानां हितकाम्यया

**आचार्या** – शुभमस्तु प्रियच्छात्राः ! अपि कुशलिनः भवन्तः ?

**छात्राः** – नमो नमः, मान्ये ! आम्, वयं कुशलिनः।

**आचार्या** – साधु ! उपविशन्तु। दिनेश ! एवं भाति, भवान् किञ्चित् प्रष्टुम् इच्छति।

**दिनेशः** – सत्यं महोदये ! अस्माकं भारतवर्षं प्राचीनकालाद् एव कृषिप्रधानं राष्ट्रम् अस्ति इति वयं शृणुमः। अद्य वयं कृषेः महत्त्वविषये किमपि ज्ञातुम् इच्छामः।

**रश्मिः** – आचार्ये ! **तस्मात् सर्वं परित्यज्य कृषिं यत्नेन कारयेत्** इति पद्यम् अहं श्रुतवती, अस्य कः अभिप्रायः ?

**आचार्या** – सुन्दरं पद्यम् ! कृषिकर्मणा एव सर्वविधानां सस्यानां प्राप्तिर्भवति। कृष्या एव अन्नफलादीनां वनस्पतीनां दुग्धादीनां च उत्पत्तिर्भवति। एतस्मात् कारणात् अन्यानि सर्वाणि कर्माणि त्यक्त्वा वयं कृषिं कुर्मः इति अस्य पद्यांशस्य आशयः। वयं जानीमः एभिः विना अस्माकं जीवनमेव न सम्भवति। अस्माकं कृषकाः महता श्रमेण अन्नादीनि उत्पादयन्ति। अधुना भवन्तः वदन्तु ते तत्र कं कं श्रमं कुर्वन्ति ?









© NCERT not to be republished

**कविता** – आचार्ये ! ते आदौ भूमेः जलादीनां च सम्यक् परीक्षणं कुर्वन्ति।


**प्रकाशः** – योग्यां भूमिं चित्वा भूमिकर्षणं बीजवपनादिकं च कुर्वन्ति।

**आचार्या** – सत्यम्, एतदेव कृषिविज्ञानम्।

**विवेकः** – महोदये ! अस्माकं शास्त्राणां कृषिकार्यविषये का दृष्टिः ?

**आचार्या** – कृषिविषये पराशरप्रभृतयः प्राचीनाः महर्षयः सूक्ष्मं विशदं च विचारितवन्तः। आचार्यकौटिल्यः कृषिविद्यां वार्ताविद्यायां समावेशयति। वयम् अद्य कृषिविद्यायाः विषये एव अध्ययनं कुर्मः।

**छात्राः** – अस्तु महोदये! वयं पठनार्थम् उत्सुकाः।



© NCERT not to be republished

अन्नं प्राणा बलं चान्नमन्नं सर्वार्थसाधनम्।
देवासुरमनुष्याश्च सर्वे चान्नोपजीविनः ॥ १ ॥



अन्नं हि धान्यसञ्जातं धान्यं कृष्या विना न च।
तस्मात् सर्वं परित्यज्य कृषिं यत्नेन कारयेत् ॥ २ ॥



समर्थेन कृषिः कार्या लोकानां हितकाम्यया।
असमर्थो हि कृषको भिक्षां प्राप्नोति मानवः ॥ ३ ॥

एकया च पुनः कृष्या प्रार्थको नैव जायते।
कृष्यन्वितो हि लोकेऽस्मिन् भूयादेकश्च भूपतिः ॥ ४ ॥



सुवर्णरौप्यमाणिक्यवसनैरपि पूरिताः।
तथापि प्रार्थयन्त्येव कृषकान् भक्ततृष्णया ॥ ५ ॥



गोभूमिदेवभक्ताश्च नितरां सत्यवादिनः।
परानुकूल्यनिरताः सन्ततं तुष्टचेतसः ॥ ६ ॥

तन्द्रालस्यादिहीनाश्च कामक्रोधादिवर्जिताः।
परस्परं स्नेहभाजं साह्यकर्मरताश्च ये ॥ ७ ॥



आघ्राय पीत्वा च मृदं तोलयित्वाऽपि वा क्वचित्।
क्षिप्त्वा पात्रस्थसलिले घटिकावधिकोविदः ॥ ८ ॥



© NCERT not to be republished

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| सर्वार्थसाधनम् अका. नपु. प्र. एकव. (षष्ठीतत्पुरुषः) | सर्वे च ते अर्थाः सर्वार्थाः, सर्वार्थानां साधनं सर्वार्थसाधनम् | सभी उद्देश्यों एवं पदार्थों का साधक | accomplisher of all objectives and material goals | |
| अन्नोपजीविनः अन्नोपजीव + णिनि , नका. पुं. प्र. ब. व. (उपपदतत्पुरुषः) | अन्नेन उपजीवितुं शीलं यस्य | अन्न से ही जीवित रहने वाले / जीवन निर्वाह करने वाले | those who sustain on grain | |
| धान्यसञ्जातम् अका., नपुं., प्र. एक. व. (तृतीयातत्पुरुषः) | धान्येन सञ्जातं धान्यसञ्जातम् | धान्य / फसल से उत्पन्न | produced from crops/grain | |
| कृष्या- इका., स्त्री.,तृ. ए.व. | कृषिकर्मणा | कृषि कर्म द्वारा | through agricultural activity | |
| कृष्यन्वितः पुं (तृतीयातत्पुरुषः) | कृष्या अन्वितः, कृष्यन्वितः | कृषि कर्म से युक्त | engaged in agriculture | |
| परित्यज्य, (अव्ययम्) परि+√त्यज् +ल्यब् | परित्यागं कृत्वा | परित्याग करके | having after renouncing | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| कारयेत् डुकृञ् √कृ+णिच्, विधि.लि.प्र. पु. ए.व. | कारयतु | कराएं | to be done | |
| समर्थेन | योग्येन/ शक्तेन | समर्थ / योग्य पुरुष द्वारा | by a capable/ qualified man | |
| नितराम् (अव्ययम्) | निश्चयेन | निश्चय पूर्वक | with certainty/ firmly | |
| सत्यवादिनः सत्यं + √वद् +णिनि नका. पुं. प्र. ब. व. (उपपदतत्पुरुषः) | सत्यं वदन्ति इति | सत्य बोलने के स्वभाव वाला | truthful by nature | |
| भूयात्भू ,आशी. लि.प्र.पु. ए.व. | भवेत् | हो | let there be | |
| भूपतिः, इका. पुं.प्र.ए.व. (षष्ठीतत्पुरुषः) | भुवः पति भूपतिः/ नृपः | राजा | king | |
| सुवर्णरौप्य-माणिक्यवसनैः (इतरेतरद्वन्द् ) | सुवर्णं च रौप्यं च माणिक्यं च वसनं च, तैः | सोने, चाँदी , रत्नों एवं वस्त्रों से | with gold, silver, gems, and garments | |
| पूरितः (अका.पुं. प्र.ब.व.) | परिपूर्णः | सुसम्पन्न | well-endowed/ prosperous | |
| भक्ततृष्णया (षष्ठीतत्पुरुषः आका.,स्त्री, तृ.वि.,ए.व.) | भक्तस्य तृष्णा भक्ततृष्णा तया भक्ततृष्णया (भोजनेच्छया) | भोजन की इच्छा से | with a desire for food | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| परानुकूल्यनिरताः अका. प्र. बहुव. (सप्तमीतत्पुरुषः) | अनुकूलस्य भावः आनुकूल्यम्, परस्य आनुकूल्यम् परानुकूल्यम्, परानुकूल्ये निरताः | परोपकार में निरत | devoted to benevolence/ altruism | |
| सन्ततम् | निरन्तरम् | सतत | continuously | |
| तुष्टचेतसः सका. पुं.लि.प्र. बहु. | तुष्टानि चेतांसि येषां ते (बहुव्रीहिः) | प्रसन्न चित्त वाले | cheerful/happy-minded | |
| तन्द्रालस्या-दिहीनाः (इतरेतरद्वन्द्वः बहुव्रीहिः तृतीयातत्पुरुषः च) | तन्द्रा च आलस्यं च तन्द्रालस्ये तन्द्रालस्ये आदिनी येषां ते तन्द्रालस्यादयः, तन्द्रालस्यादिभिः हीनाः तन्द्रालस्यादिहीनाः | तन्द्रा आलस्य आदि से रहित | free from lethargy, laziness, etc. | |
| कामक्रोधादि-वर्जिताः अका. पुं. प्र.ब. व (इतरेतरद्वन्द्वः बहुव्रीहिः तृतीयातत्पुरुषः च) | कामश्च क्रोधश्च कामक्रोधौ कामक्रोधौ आदी येषां ते कामक्रोधादयः कामक्रोधादिभिः वर्जिताः | काम-वासना (इच्छा ) क्रोधादि से रहित | free from lust (desire), anger, etc. | |
| परस्परम् | मिथः | परस्पर/ एक दूसरे में | towards one another | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| स्नेहभाजम् का.पुं.,द्वि. वि., ए.व. (उपपदतत्पुरुषः) | स्नेहं भजते इति स्नेहभाक्, तम् | स्नेह भावना से युक्त | filled with affection | |
| साह्यकर्मरताः अका., पुं., प्र. वि.बहु.व. (कर्मधारयः सप्तमीतत्पुरुषः) | सहस्य भावः साह्यं, साह्यं च तत् कर्म साह्यकर्म साह्यकर्मणि रताः = साह्यकर्मरताः | सहयोग की भावना से युक्त | filled with a spirit of cooperation | |
| आघ्राय ल्यबन्तम् अव्ययम् (आङ्+√घ्रा + ल्यप्) | घ्रात्वा | सूँघकर | by smelling | |
| मृदम् | मृत्तिकाम् | मिट्टी को | to the soil | |
| तोलयित्वा, √तुल्+णिच् +क्त्वा | मापनं / तोलनं कृत्वा | तोलकर/ नापकर | by weighing/ measuring | |
| क्षिप्त्वा, √क्षिप्+क्त्वा | क्षेपणं कृत्वा | फेंककर | by throwing | |
| पात्रस्थसलिले अका.पुं.स.ए.व. उपपदतत्पुरुष-कर्मधारयः | पात्रे तिष्ठति इति पात्रस्थम्, पात्रस्थं च तत् सलिलम्, पात्रस्थसलिलम्, तस्मिन् पात्रस्थसलिले (पात्रस्थिते जले) | बर्तन में स्थित जल में | in the water contained in a vessel | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| घटिकावधि कोविदः अका., पुं. प्र.वि. ए.व. (षष्ठीतत्पुरुषः), | घटिकायाः अवधिः घटिकावधिः, घटिकावधेः कोविदः घटिकावधि कोविदः (कालज्ञः) | एक घटि (24 मिनट ) काल को जानने वाला विद्वान् (कालज्ञ) | a scholar knowledgeable about the passage of time (specifically a *ghati* or 24 - minute interval) | |
| कोविदः, अका.पुं. प्र.ए.व. | सुधीः | विद्वान् | scholar/learned person | |

## अत्र इदम् अवधेयम्

आचार्या – कौटिल्येन *अर्थशास्त्रे* चतस्रो विद्याः वर्णिताः। तासु वार्ता इत्याख्यायां विद्यायां कृषिविद्या अन्तर्भूता भवति। भारतीयज्ञानपरम्परायां कृषिविज्ञानमाधारीकृत्य काश्यपीयकृषिपद्धतिः, कृषिपाराशरः, वृक्षायुर्वेदः इत्यादयः ग्रन्थाः रचिताः। यथा—

कृषिशास्त्रे अन्नस्य चत्वारः प्रकाराः वर्णिताः सन्ति। काश्यपीयकृषिपद्धतौ अन्नं चतुर्विधम् उक्तम् – व्रीह्यादिरूपं मुद्गसादिरूपं शाकादिरूपं लताकुसुमादिरूपं च

| | | |
|---|---|---|
| 1. व्रीह्यादिरूपेण (धान्यरूपेण) यत् अन्नं धान्यजातं तत् व्रीहयादिरूपम्। |  | उदाहरणवाक्यम्— व्रीह्यादिरूपेण अन्वेन शरीरं पुष्टं भवति। |

© NCERT not to be republished

| | | |
|---|---|---|
| 2. मुद्‌गमाषादिरूपेण (द्विदलादिरूपेण) यत् अन्नं मुद्‌गमाषादिजातं तत् मुद्‌गमाषादिरूपम्। |  | उदाहरणवाक्यम्— मुद्‌गमाषादिरूपेण अन्वेन बलं वर्धते। |
| 3. शाकादिरूपेण (शाकजातरूपेण) यत् अन्नं शाकादिजातं तत् शाकादिरूपम्। |  | उदाहरणवाक्यम्— शाकादिरूपेण अन्नेन स्वास्थ्यं रक्ष्यते। |
| 4. लताकुसुमादिरूपेण (फलपुष्पादिरूपेण) यत् अन्नं लताकुसुमादिजातं तत् लताकुसुमादिरूपम्। |  | उदाहरणवाक्यम्— लताकुसुमादिरूपेण अन्नेन रोगप्रतिरोधकशक्तिः वर्धते। |

१. व्रीह्यादिधान्यरूपेण

२. मुद्गमाषादि-(द्विदल) - मुद्गमाषादि

३. शाकादिभिः

४. लताकुसुमादिभिः

५. क्रमेन-क्रमेण

**घटिकावधिकोविदः**

कृषिकर्मणि स एव योग्यः भवति यः ऋतुं कालं च सम्यग् जानाति। प्राचीनकाले एतादृशः जनः घटिकावधिकोविदः इति रूपेण ज्ञायते स्म।

© NCERT not to be republished

## अभ्यासाद् जायते सिद्धिः

**१. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत—**

(क) तुष्टचेतसः के भवन्ति?

(ख) अन्नोपजीविनः के?

(ग) कृष्या विना किं भवति?

(घ) सर्वं परित्यज्य किं कारयेत्?

(ङ) मानवः भिक्षां कदा प्राप्नोति?

(च) माणिक्यादिभिः पूरिताःजनाः भक्ततृष्णया कान् प्रार्थयन्ति?

**२. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत—**

(क) **अन्नं** सर्वार्थसाधनं भवति।

(ख) सर्वं परित्यज्य **कृषिं** यत्नेन कारयेत्।

(ग) कृषिकार्ये रताः **पुरुषाः** गोभूमिदेवभक्ताः भवन्ति।

(घ) **कृष्या** विना धान्यं न भवति।

(ङ) **लोकानां** हितकाम्यया कृषिः कार्या।

**३. मञ्जूषातः पदानि चित्वा भावार्थेषु रिक्तस्थानानि पूरयत—**

आघ्राय, विना, परित्यज्य, समर्थेन, तुष्टचेतसः, क्षिप्त्वा

(क) कृषिकार्ये रताः जनाः ................ भवन्ति।

(ख) सर्वं ......................... कृषिं यत्नेन कारयेत्।

(ग) धान्यं कृष्या ............................ न भवति।

(घ) लोकानां हितकाम्यया .............. कृषिः कार्या।

(ङ) कृषकः पात्रस्थसलिले मृत्तिकाम् .............. मृदं परीक्षते।



© NCERT not to be republished

(च) कृषकः मृत्तिकाम् ……………… कृषिभूमिं परीक्षते।

४. रेखाङ्कित-पदानां सन्धिविच्छेदं कुरुत —

(क) सर्वे **चान्नोपजीविनः**। ……………………………………………………।

(ख) प्रार्थको **नैव** जायते। ……………………………………………………।

(ग) **गोभूमिदेवभक्ताश्च** नितरां सत्यवादिनः। ……………………………………………………।

(घ) मृदं **तोलयित्वाऽपि** वा क्वचित्। ……………………………………………………।

(ङ) घना स्निग्धा च **भूरपि**। ……………………………………………………।

## स्वाध्यायान्मा प्रमदः

**पाठे पठितानां श्लोकानाम् अन्वयं भावार्थं च जानीत।**

१. **पदच्छेदः** – अन्नम् प्राणाः बलम् च अन्नम् अन्नम् च सर्वार्थसाधनम् देव-असुर-मनुष्याः च सर्वे च अन्न-उपजीविनः

**अन्वयः** – अन्नं प्राणाः, अन्नं बलं च, अन्नं सर्वार्थसाधनम्, देवासुरमनुष्याः च सर्वे अन्नोपजीविनः (सन्ति)।

**भावार्थः** – अन्नम् एव प्राणाः (प्राणवर्धकम्) अन्नम् एव बलम् (बलवर्धकम्) अस्ति। अन्नम् हि सर्वविध- उद्देश्यानां, पदार्थानां साधनम् अस्ति। देवाः, असुराः, मनुष्याश्च एते सर्वे अपि अन्नेन उपजीवन्ति।

२. **पदच्छेदः** – अन्नम् हि धान्य-सञ्जातम् धान्यम् कृष्या विना न च तस्मात् सर्वम् परित्यज्य कृषिम् यत्नेन कारयेत्

**अन्वयः** – अन्नं हि धान्यसञ्जातम्, धान्यं च कृष्या विना न, तस्मात् सर्वं परित्यज्य यत्नेन कृषिं कारयेत्।

**भावार्थः** – तण्डुलादिकम् अन्नं व्रीह्यादि-धान्येन उत्पन्नं भवति। किन्तु कृषिकर्म विना धान्यस्य उत्पत्तिः न भवति। अतः सर्वाणि कर्माणि त्यक्त्वा अन्नानि लब्धुं प्रयत्नपूर्वकं कृषिकर्म करणीयम्।

© NCERT not to be republished

३. **पदच्छेदः** – समर्थेन कृषिः कार्या लोकानां हितकाम्यया असमर्थः हि कृषकः भिक्षां प्राप्नोति मानवः

**अन्वयः** – समर्थेन (पुरुषेण ) लोकानां हितकाम्यया कृषिः कार्या। कृषकः असमर्थो हि मानवः भिक्षां प्राप्नोति

**भावार्थः** – समर्थेन ( योग्येन ) पुरुषेण भूर्लोकस्थप्राणिनां हितस्येच्छया (कल्याणाय) कृषिकर्म कर्तव्यम्। यस्मिन् देशे समाजे वा कृषकः कृषिकर्मणि असमर्थो भवति तत्रस्थजनाः भिक्षाटनेन जीविकां निर्वहन्ति। जीवनरक्षायै अन्येषाम् उपरि समाजे आश्रिताः भवन्ति इत्यर्थः।

४. **पदच्छेदः** – एकया च पुनः कृष्या प्रार्थकः न एव जायते कृषि-अन्वितः हि लोके अस्मिन् भूयात् एकः च भूपतिः

**अन्वयः** – पुनः च एकया कृष्या एव प्रार्थकः न जायते अस्मिन् लोके एकः कृष्यन्वितः हि भूपतिः च भूयात्

**भावार्थः** – यः केवलं कृषिकर्मणा स्वजीवनं यापयति सः कदाचित् अपि याचकः न भवति। कृषिकर्मद्वारा एव सः अस्मिन् संसारे भूपतिः (स्वामी) भवितुं शक्नोति।

५. **पदच्छेदः** – सुवर्ण-रौप्य माणिक्य-वसनैः अपि, पूरिताः तथा, अपि, प्रार्थयन्ति, एव, कृषकान्, भक्त-तृष्णया

**अन्वयः** – सुवर्णरौप्यमाणिक्यवसनैः अपि (जनाः) पूरिताः तथापि भक्ततृष्णया कृषकान् प्रार्थयन्ति एव।

**भावार्थः** – जनाः स्वर्णैः रजतैः माणिक्यादिभिः वस्त्रैश्च सम्पन्नाः सन्तः अपि जीवनरक्षायै भोजनेच्छया कृषकमेव आश्रयन्ति न तु रत्नानि भक्षयन्ति।

६. **पदच्छेदः** – गो-भूमि-देव-भक्ताः च नितराम् सत्य-वादिनः पर-अनुकूल्य-निरताः सन्ततम् तुष्टचेतसः

**अन्वयः** – गोभूमिदेवभक्ताः नितरां सत्यवादिनः, परानुकूल्यनिरताः सन्ततं तुष्टचेतसः च (भवन्ति)।

**भावार्थः** – कृषिकार्ये संलग्नाः जनाः गोभक्ताः भूमिभक्ताः देवभक्ताः सत्यवादिनश्च भवन्ति। ते सर्वदा परोपकारिणः सन्तुष्टमनसश्च भवन्ति।

७. **पदच्छेदः** – तन्द्रा-आलस्य-आदिहीनाः च काम-क्रोध-आदि-वर्जिताः परस्परम् स्नेह-भाजम् साह्य-कर्म-रताः च ये

© NCERT not to be republished

**अन्वयः** – ये तन्द्रालस्यादिहीनाः कामक्रोधादिवर्जिताः परस्परं स्नेहभाजं साह्यकर्मरताः च (भवन्ति)।

**भावार्थः** – कृषिकार्ये रताः कृषकाः तन्द्रारहिताः आलस्यरहिताः कामरहिताः क्रोधरहिताश्च भवन्ति। एवञ्च परस्परं स्नेहशीलाः परोपकारिणश्च भवन्ति।

८. **पदच्छेदः** – आघ्राय पीत्वा च मृदम् तोलयित्वा अपि वा क्वचित् क्षिप्त्वा पात्रस्थ-सलिले घटिका-अवधि-कोविदः

**अन्वयः** – आघ्राय पीत्वा मृदं तोलयित्वा च अपि वा क्वचित् घटिकावधिकोविदः पात्रस्थसलिले क्षिप्त्वा (कृषियोग्या भवति)

**भावार्थः** – यत्र कृषिकर्म अभीष्टं तत्रत्यायाः भूमेः परीक्षणनिमित्तं केचन उपायाः अत्र निर्दिष्टाः सन्ति, यथा तत्र स्थितां मृत्तिकां घ्रात्वा, तत्र विद्यमानं भूजलं पीत्वा , कुत्रचित् मृत्तिकायाः तोलनं कृत्वा च भूमेः उर्वराशक्तेः परीक्षणं करणीयम्। पात्रस्थे जले मृत्तिकां क्षिप्त्वा पुनः एकघटिकायाः अनन्तरं तस्य जलस्य अवलोकनं कृत्वा भूमेः योग्यतायाः परीक्षणं करणीयम्।

## यस्तु क्रियावान् मनुजः स विद्वान्

**१. अधो लिखेतेषु परियोजनाकार्येषु यथेच्छं कार्यत्रयं कुरुत—**

१. द्वादशमासेषु षट्सु ऋतुषु वा कानि कानि अन्नानि, फलानि, लताकुसुमादीनि वा भवन्ति इति केनचित् कृषकेण मातापितृभ्यां च सह परिचर्चां कृत्वा कक्षायां रेखाचित्रमाध्यमेन प्रस्तौतु।

२. ऋतु-अनुसारं अन्नानां शाकानां फलानां च नामानि लिखत।

३. भारतस्य विभिन्नेषु राज्येषु यानि अन्नानि फलानि वा बाहुल्येन भवन्ति तेषां राज्यानुसारं नामानि लिखत।

४. भवतः ग्रामे निकटवर्तिक्षेत्रे वा कानि कानि अन्नानि फलानि शकानि वा भवन्ति तेषां नामानि लिखत।

५. वर्षे षड्मासाभ्यन्तरे कस्यचन वृक्षस्य रोपणं तस्य सरक्षणं च कुरुत।

६. केनचित् कृषकेण सह परिचर्चां कृत्वा कस्यचन अन्नस्य शाकस्य वा कृषिप्रक्रियां जानीत।

© NCERT not to be republished